शान्वयशीलयुक्ताः। विधानदक्षाः पटवोऽनुकूला ये चार्य्यदेशप्रभवा द्विजेन्द्राः। गुरुश्च वेदान्तविदार्य्यवंशसमुद्भवः शीलकुलाभिरूपः। पुराणशास्त्राभिरतोऽतिदक्षः प्रसन्नगम्भीरसरस्वतीकः। सिताम्बरः कुण्डलहेमसूत्रकेयूरकण्ठाभरणाभिरामः। पूर्व्वेण ऋग्वेदविदावथास्तां यजुर्व्विदौ दक्षिणतश्च शस्तौ। स्थाप्यौ द्विजौ सामविदौ तु पश्चादाथर्व्वणावुत्तरतस्तु कार्य्यौ। विनायकादिग्रहलोकपालवस्वष्टकादित्यमरुद्गणानाम्। ब्रह्माच्युतेशार्कवनस्पतीनां स्वमन्त्रतो होमचतुष्टयं स्यात्। जप्यानि सूक्तानि तथैव चैषामनुक्रमेणापि यथास्वरूपम्। होमावसाने कृततूर्य्यनादो गुरुर्गृहीत्वा वलिपुष्पधूपम्। आवाहयेल्लोकपतीन् क्रमेण मन्त्रैरमीभिर्यजमानयुक्तः। एह्येहि सर्व्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरामरेश!। संवीज्यमानोऽप्सरसाङ्गणेन रक्षाध्वरन्नो भगवन्नमस्ते (इन्द्रस्य)। एह्येहि सर्व्वामरहव्यवाह! मुनिप्रवीरैरभितोऽभिजुष्ट!। तेजस्विना लोकगणेन सार्द्धं ममाध्वरं रक्ष कवे! नमस्ते" (अग्नेः)। एह्येहि वैवस्वत! धर्म्मराज! सर्व्वामरैरर्च्चितदिव्यमूर्त्ते!। शुभाशुभानन्दशुचामधीश। शिवाय नः पाहि मखं नमस्ते" (यमस्य)। एह्येहि रक्षोगणनायकस्त्वं सर्व्वैस्तु वेतालपिशाचसङ्घैः। ममाध्वरं पाहि शुभाधिनाथ! लोकेश्वरस्त्वं भगवन्नमस्ते (नैरृतस्य)। एह्येहि यादोगणवारिधीनाङ्गणेन पर्जन्यमहाप्सरोभिः। विद्याधरेन्द्रामरगीयमान! पाहि त्वमस्मान् भगवन्नमस्ते (वरुणस्य)। एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढ़ः सह सिद्धसङ्घैः। प्राणाधिपः कालकवेः सहायः गृहाण पूजां भगवन्नमस्ते (वायोः)। एह्येहि यज्ञेश्वर! यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्द्धम्। सर्व्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते (सोमस्य)। एह्येहि विश्वेश्वर! नस्त्रिशूलकपालखट्वाङ्गधरेण सार्द्धम्। लोकेश! यज्ञेश्वर! यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते (ईशस्य)। एह्येहि पातालधराधरेन्द्र! नागाङ्गनाकिन्नरगीयमान!। यक्षोरगेन्द्रामरलोकसङ्घैरनन्त! रक्षाध्वरमस्मदीयम्" (अनन्तस्य)। एह्येहि विश्वाधिपते! मुनीन्द्र लोकेन सार्द्धं पितृदेवताभिः। सर्व्वस्य धातास्यमितप्रभाव! विशाध्वरन्नो भगवन्नमस्ते (ब्रह्मणः)। त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्व्वन्तु तानि मे। देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः। ऋषयो मनवो गावो देवमातर एव च। सर्व्वे ममाध्वरे रक्षां प्रकुर्व्वन्तु मुदान्विताः। इत्यावाह्य सुरान् दद्यादृत्विग्भ्यो हेमभूषणम्। कुण्डलानि च हैमानि सूत्राणि कटकानि च। अङ्गुलीयपवित्राणि वासांसि शयनानि च। द्विगुणं गुरवे दद्याद्भूषणाच्छादनानि च। जपेयुः शान्तिकाध्यायं जापकाः सर्व्वतोदिशम्। तत्रोषितास्तु ते सर्व्वे कृत्वैवमधिवासनम्। आदावन्ते च मध्ये च कुर्य्याद्ब्राह्मणवाचनम्। ततो मङ्गलशब्देन स्नापितो वेदपुङ्गवैः। त्रिःप्रदक्षिणमावर्त्य गृहीतकुसुमाञ्जलिः। शुक्लमाल्याम्बरोभूत्वा तां तुलामभिमन्त्रयेत्। नमस्ते सर्व्वदेवानां शक्तिस्त्वं सत्यमास्थिता। साक्षिभूता जगद्धात्री निर्म्मिता विश्वयोनिना। एकतः सर्व्वसत्यानि तथानृतशतानि च। धर्म्माधर्म्मकृतां मध्ये स्थापितासि जगद्धिते!। त्वं तुले! सर्व्वभूतानां प्रमाणमिह कीर्त्तिता। मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते। योऽसौ तत्त्वाधिपोदेवः पुरुषः पञ्चविंशकः। स एकोऽधिष्ठितो देवि! त्वयि तस्मान्नमोनमः। नमोनमस्ते गोविन्द! तुलापुरुषसंज्ञक!। त्वं हरे! तारयस्वास्मानस्मात्संसारकर्दमात्। पुण्यकालं समासाद्य कृत्वैवमधिवासनम्। पुनः प्रदक्षिणं कृत्वा तुलामारोहयेद्बुधः। सखड्गचर्म्मकवचः सर्व्वाभरणभूषितः। धर्म्मराजमथादाय हैमं सूर्य्येण संयुतम्। कराभ्यां बद्धमुष्टिभ्यामास्ते पश्यन् हरेर्मुखम्। ततोऽपरे तुलाभागे न्यसेयुर्द्विजपुङ्गवाः। समादभ्यधिकं यावत् काञ्चनं चातिनिर्म्मलम्। पुष्टिकामस्तु कुर्व्वीत भूमिसंस्थं नरेश्वरः। क्षणमात्रं ततः स्थित्वा पुनरेवमुदीरयेत्। नमस्ते सर्व्वभूतानां साक्षिभूते! सनातनि!। पितामहेन देवि! त्वं निर्म्मिता परमेष्ठिना। त्वया धृतं जगत्सर्व्वं सहस्थावरजङ्गमम्। सर्व्वभूतात्मभूतस्थे! नमस्ते विश्वधारिणि!। ततोऽवतीर्य्य गुरवे पूर्व्वमर्द्धं निवेदयेत्। ऋत्विग्भ्योऽपरमर्द्धन्तु दद्यादुदकपूर्व्वकम्। गुरवे ग्रामरत्नानि ऋत्विग्भ्यश्च निवेदयेत्। प्राप्य तेषामनुज्ञां तु तथान्येभ्योऽपि दापयेत्। दीनानाथविशिष्टादीन् पूजयेद्ब्राह्मणैः सह। न चिरं धारयेद्गेहे सुवर्णं प्रोक्षितं बुधः। तिष्ठद्भयावहं यस्माच्छोकव्याधिकरं नृणाम्। शीघ्रं परस्वीकरणाच्छ्रेयः प्राप्नोति मानवः। अनेन विधिना यस्तु तुलापुरुषमाचरेत्। प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरं वसेत्। विमानेनार्कवर्णेन किङ्किणीजाल-